# Mukundaprasada Stavaraja

# મુકુન્દપ્રસાદસ્તવરાજઃ

## Document Information

Text title : Mukundaprasada Stavaraja

File name : mukundaprasAdastavarAjaH.itx

Category : vishhnu, stavarAja

Location : doc_vishhnu

Proofread by : Rajesh Thyagarajan

Description/comments : From Stotrasamuchchaya 2, Edited by Pandit K. Parameshwara Aithal

Latest update : May 10, 2023

Send corrections to : sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

June 29, 2023

*sanskritdocuments.org*

# મુકુન્દપ્રસાદસ્તવરાજઃ

અલઙ્કારમોઙ્કારમઞ્જૂષિકાયા-
    સ્ત્રિલોકીનિદાનં ત્રિવેદી નિધાનમ્ ।
મણિં કઞ્ચિદીડે સુમઙ્ગલ્યશીલં
    યશોદાનશૂરં યશોદાકિશોરમ્ ॥ ૧॥

?? આન્દ્રાભમિન્દ્વરશ્યામગાત્રં
    સનન્દાદિયોગીન્દ્રવન્દ્યં પવિત્રમ્ ।
શરણ્યં સહસ્રાંશુશીતાંશુનેત્ર
    પ્રપદ્યેઽનવદ્યાઙ્ગમક્રૂરમિત્રમ્ ॥ ૨॥

પ્રકાશૈકરૂપં હૃદાકાશદીપં
    પ્રમાતારવિન્દપ્રભાચોરપાદમ્ ।
મહારત્નવિન્યસ્તમઞ્જીરભૂષા-
    મયૂખાવલીલિપ્તપાદાઙ્ગુલીકમ્ ॥ ૩॥

સમુત્તપ્તચામીકરાકારવસ્ત્રં
    કનદ્દિવ્યમાણિક્યકાઞ્ચીકલાપમ્ ।
સ્ફુરત્કૌસ્તુભશ્રીપરિવ્યાપ્તવક્ષઃ-
    સ્થલીલોલહારાવલીરાજમાનમ્ ॥ ૪॥

બૃહત્કઙ્કણાબદ્ધશોણાશ્મમાલા-
    રુચિસ્તોમસંરક્તહસ્તારવિન્દમ્ ।
સુવર્ણાઙ્ગદજ્યોતિરુદ્ભાસિતાંસં
    પરિષ્કારનિષ્કેણ પર્યાપ્તકણ્ઠમ્ ॥ ૫॥

ગદાશઙ્ખચક્રાસિકોદણ્ડસેવ્યં
    ભુજઙ્ગાધિરાજાભિરામોરુબાહુમ્ ।
લસત્કમ્બુબિમ્બોકહૃત્કન્ધરાભં
    નવીનપ્રવાલપ્રવાહારુણોષ્ઠમ્ ॥ ૬॥

સુવૃત્તાતિશુદ્ધદ્યુતિસ્નિગ્ધદન્ત-
પ્રતિક્ષિપ્તસમ્ભિન્નકુન્દપ્રસૂનમ્ ।
હસત્કર્ણિકારસ્ફુરત્કર્ણિકાર-
પ્રભામઞ્જરીપિઞ્જરીભૂતગણ્ડમ્ ॥ ૭॥

પ્રબુદ્ધારવિન્દપ્રતીકારનેત્રં
પ્રકૃષ્ટપ્રકાશેન્દુદાયાદવક્ત્રમ્ ।
કિરીટદ્યુતિક્ષિપ્તસૌવર્ણગાત્રં
કૃપાલું પરં નૌમિ પદ્માકલત્રમ્ ॥ ૮॥

સમાકર્ણિતોદીર્ણગન્ધર્વચાટુ-
પ્રબન્ધઃ પતઙ્ગપ્રધાનાધિરૂઢઃ ।
પ્રપન્નાર્તિહારઃ પ્રણોદપ્રવીણઃ
પુરસ્તાદદસ્તાત્ પુરાણઃ પુમાન્ નઃ ॥ ૯॥

સુધાસારસુશ્વેતયા દેહભાસા
સમન્તાન્નિષિઞ્ચન્ સ પઞ્ચાયુધો નઃ ।
સદા સન્નિધાનં નિધાનં બુધાનાં
વિધેયાદમેયાગમાન્તાવિધેયઃ ॥ ૧૦॥

જગન્નાથ જન્માદયસ્તે ન સન્તી-
ત્યનેકે ગૃણન્તિ શ્રુતીનાં નિગુમ્ભાઃ ।
અસક્તસ્વભક્તાનુકમ્પી પુરસ્ત્વં
દરીદૃશ્યસે દેવ નન્દાદિગેહે ॥ ૧૧॥

ઇહાજાયમાનો મુહુર્જાયતેઽપી-
ત્યસાવાદિદેવઃ શ્રુતિઃ કાચિદિન્ધે ।
ન ચેયં વિરોધપ્રસક્તિર્યતસ્તે
ન ખલ્વીદૃશં જન્મકર્માદિ દિવ્યમ્ ॥ ૧૨॥

ય એષોઽન્તરાદિત્ય ઉદ્યત્પ્રકાશઃ
સુવર્ણારુણશ્મશ્રુકેશઃ સુપર્ણઃ ।
જ્વલદ્દિવ્યભૂષાંશુદેદીપ્યમાનઃ
સ એવેતિ નિશ્ચીયતે સાધુભિસ્ત્વમ્ ॥ ૧૩॥

ન તત્ર પ્રકાશત્યસૌ તીવ્રભાનુ-

ર્ન વા શીતભાનુર્ન તારાકુલાનિ ।
ઇમા વિદ્યુતો નૈવ વહ્નિઃ કુતોઽયં
ત્વદીયેન સર્વં પ્રકાશન ભાતિ ॥ ૧૪॥

રસોઽસિ ત્વમપ્સુ પ્રભા ચણ્ડમાનૌ
સુગન્ધોઽસિ ભૂમૌ સુધા શીતધામ્નિ ।
ભવાન્ પુંસિ ચૈતન્યમૂષ્મા કૃશાનૌ
ધનુર્વ્યાનિ ચ ત્વં સમીરે ચ સત્ત્વમ્ ॥ ૧૫॥

નરેન્દ્રં નરાણાં સુરેન્દ્રં સુરાણાં
ધરિત્રીધરાણાં ચ સૌવર્ણશૈલમ્ ।
કવીનાં ચ શુક્રં સુરાર્યં ગુરૂણાં
ભૃગું ત્વામૃષીણાં બુધાઃ સઙ્ગિરન્તે ॥ ૧૬॥

કુમારો ભવાન્ નાથ સેનાપતીનાં
મુનીનાં ભવાન્ વ્યાસનામા મુનીન્દ્રઃ ।
ભવાન સ્થાવરાણાં તુષારાદ્રિરુચ્ચૈ-
ર્ભવાન્ પારિજાતોઽસ્તિ કલ્પદ્રુમાણામ્ ॥ ૧૭॥

ભવાન્ શઙ્કરો નામ રુદ્રેષુ ભદ્રો
ભવાન્ કાપિલી યોગસિદ્ધેષુ મૂર્તિઃ ।
ભવાન્ વાસુકિઃ પન્નગેષુ પ્રવીરો
ભવાનુત્તમૌજાઃ પતઙ્ગેષુ તાર્ક્ષ્યઃ ॥ ૧૮॥

ભવાનક્ષરાણામકારઃ પ્રતીતો
ભવાન્ પાણ્ડવાનામપિ શ્વેતવાહઃ ।
ભવાન્ પાદપાનાં વરઃ પિપ્પલદ્રુ-
ર્ભવાન્ સામવેદોઽસ્તિ વેદેષુ શૌરે ॥ ૧૯॥

ત્વમુચ્ચૈઃશ્રવા વાજિનાં વારણાનાં
ત્વમૈરાવતસ્ત્વં ગવાં કામધેનુઃ ।
ત્વમમ્ભોધિજન્માસિ રત્નં મણીનાં
ત્વમોઙ્કારનામાસિ મન્ત્રો મનૂનામ્ ॥ ૨૦॥

શ્રિયા સંવિદા વા બલેનાપિ શક્ત્યા
રુચા વાપિ યુક્તં પરં વસ્તુ યદ્યત્ ।
તદેતત્ સમસ્તં પુરાણપ્રવીણ

ત્વદીયાંશસમ્ભૂતમેવામનન્તિ ॥ ૨૧॥

જ્વલત્યગ્નિરૂર્ધ્વં મરુદ્ વાતિ દિવ્યં
તપત્યેષ ભાનુઃ સૃજત્યભ્રમમ્ભઃ ।
ભુજઙ્ગાધિરાજો ભુવં ચાપિ ધત્તે
તવૈવ શ્રિયેતિ શ્રુતિઃ પ્રાહ શૌરે ॥ ૨૨॥

રમાનાથ મધ્યેહૃદમ્ભોજમધ્યે
સદા સન્નિવિષ્ટં ભવન્તં સ્મરન્તઃ ।
અપારં સમુત્તીર્ય સંસારવાર્ધિં
પરં તત્પદં તે ભજન્તે હિ સન્તઃ ॥ ૨૩॥

સલક્ષ્મીકમમ્ભોધિમધ્યાધિવાસં
સમુલ્લાસિકલ્હારમાલાભિરામમ્ ।
ઘનશ્યામવર્ણં કદાચિદ્ ભવન્તં
પરં ભાવયન્તો ભવન્તીહ ધન્યાઃ ॥ ૨૪॥

ભવાન્ શઙ્ખચક્રે દધદ્ ભાનુચક્રે
સરોજાક્ષ સંવીક્ષ્યતે યેન સાક્ષી ।
સ નિર્ધૂતપાપસ્તથા ચાકશીતિ
પ્રકૃષ્ટોઽનિકૃષ્ટો યથા ભાનુકાન્તઃ ॥ ૨૫॥

યદા ચિન્ત્યસે યૈર્હરે ચન્દ્રબિમ્બે
સુધાભિઃ પ્રભાભિઃ પ્રપઞ્ચં નિષિઞ્ચન્ ।
તદા ત્વં પુરસ્તાન્મનસ્તાપમાલા-
મશેષામમીષાં ધુનીષે નિમેષાત્ ॥ ૨૬॥

વરં પુસ્તકં ચાભયં હસ્તપદ્મે-
ર્વહન્નક્ષમાલામપિ સ્ફાટિકીં ત્વમ્ ।
સુધાનાથ સમ્ભાવ્યસે યેન શુભ્રઃ
સ કર્તા ભવેદાશુ કાવ્યાવલીનામ્ ॥ ૨૭॥

મુહુર્વલ્લવીનાં ગણં મોહયન્તં
પ્રલમ્બાલકાન્તં કદમ્બાધિરૂઢમ્ ।
નિધત્તે યદા કૃષ્ણ ચિત્તે સ્થિતં ત્વાં
તદા કામિનીનાં ભવેદેવ કામઃ ॥ ૨૮॥

મહાનીલગોત્રપ્રભામિત્રગાત્રં
    મહાચિત્રમાયૂરપિઞ્છાવતંસમ્ ।
મહાનન્દગોવૃન્દમધ્યસ્થિતં ત્વાં
    મહાન્તઃ સ્મરન્તો મહીપા ભવન્તિ ॥ ૨૯॥

સમાક્રમ્ય પાદેન દુષ્ટં ભુજઙ્ગં
    સમાલમ્બ્ય હસ્તેન પુચ્છં તદીયમ્ ।
સલીલં ફણામણ્ડલે તસ્ય નૃત્યન્
    સમાધીયસે સાધુચિત્તે વિષાર્તે ॥ ૩૦॥

સમુદ્ધૃત્ય ગોવર્ધનં છત્રરૂપં
    સમસ્તાનિ ભૂતાનિ ભીતાનિ વર્ષાત્ ।
અવન્તં ભવન્તં સકૃચ્ચિન્તયન્તો
    દુરન્તાનનન્તાપદબ્ધીંસ્તરન્તિ ॥ ૩૧॥

પવિત્રં વિચિત્રં ત્વદીયં ચરિત્રં
    સમાકર્ણ્ય કર્ણામૃતં પૂર્ણકામાઃ ।
ગલત્તોયનેત્રાઃ સ્ફુરદ્રોમગાત્રાઃ
    પ્રહર્ષપ્રકર્ષપ્રવાહં પ્રયાન્તિ ॥ ૩૨॥

કૃતી જીર્ણચેલઃ કુચેલઃ કૃશસ્ત્વાં
    પ્રપેદે યદા દેવભાવાનભિજ્ઞઃ ।
સમસ્તાનિ ભાગ્યાનિ તસ્મૈ તદાની-
    મદાસ્ત્વં દુરાપાનિ તત્તાદૃશાનિ ॥ ૩૩॥

હરે કૃષ્ણ કૃષ્ણેતિ કૃષ્ણાં વદન્તી-
    મરક્ષઃ સમક્ષં રિપૂણાં સભાયામ્ ।
અરણ્યે શરણ્યોઽભવઃ પાણ્ડવાનાં
    સરસ્યાં ગજસ્યાપિ જીવાતુરાસીઃ ॥ ૩૪॥

અહો દેવદેવ પ્રભો કૈટભારે
    કુમારં ચિરપ્રાપ્તકીનાશલોકમ્ ।
મુકુન્દાદિશસ્ત્વં મુદં ચાપ્યપૂર્વા-
    મુપાધ્યાયવર્યાય વિદ્યાપ્રદાય ॥ ૩૫॥

ઇહાનેકશોકાવલીઢાય ગાઢં
    પ્રતપ્તાય વિત્તાનિલશ્લેષ્મપૂગૈઃ ।

હૃષીકેશ હીનાય દીનાય મહ્યં
    પ્રસીદ પ્રસીદ પ્રસીદ પ્રસીદ ॥ ૩૬॥

વદેયં વદેયં ભવન્નામ દિવ્યં
    ભજેયં ભજેયં ત્વદીયં પ્રપન્નમ્ ।
જપેયં જપેયં મનું તાવકીનં
    સ્મરેયં સ્મરેયં તવૈવાઙ્ઘ્રિપદ્મમ્ ॥ ૩૭॥

હરે ચક્રધારિન્ હરે હ્લાદકારિન્
    મહાનક્રવૈરિન્ મહીભારહારિન્ ।
અહં ત્વત્કથાદુગ્ધપાનં વિનાન્યત્
    ત્યજેયં ત્યજેયં ત્યજેયં ત્યજેયમ્ ॥ ૩૮॥

ઇદં દેવ દૃષ્ટિદ્વયં મામકીનં
    તવૈવાઙ્ગસૌન્દર્યમીક્ષેત સાક્ષાત્ ।
અસો નાસિકાપિ પ્રજિઘ્રેત્ પવિત્રં
    ભવત્પાદમૂલાર્પિતં પત્રપુષ્પમ્ ॥ ૩૯॥

નમેદેષ મૂર્ધા પદામ્ભોરુહં તે
    તવૈવાર્ચયેત્ તાવિમૌ ચાપિ હસ્તૌ ।
ત્વદીયાનિ પુણ્યાનિ ધામાનિ ગચ્છેત્
    પદદ્વન્દ્વમેતન્મમાનન્ત વિષ્ણો ॥ ૪૦॥

પુરે વા બને વા ગિરૌ વા સમુદ્રે
    યદા યત્ર કુત્રાપિ યાયાજ્જનોઽયમ્ ।
તદા તત્ર તત્રાપિ પક્ષીન્દ્રકેતો
    ભવાનેવ ભદ્રં વિધેયાદમેયમ્ ॥ ૪૧॥

તનોતિ શ્રિયં તાવદાધિં ધુનીતે
    કરોતિ દ્રુતં શર્મ કર્માણિ દોગ્ધિ ।
પ્રતાપં દુરાપં ચ વિજ્ઞાનરત્નં
    પ્રદત્તે ચ મુક્તિં મુકુન્દપ્રસાદઃ ॥ ૪૨॥

ઇતિ મુકુન્દપ્રસાદો નામ સ્તોત્રરાજઃ સમ્પૂર્ણઃ ।
સ્તોત્રસમુચ્ચયઃ ૨ (૬૭)

Proofread by Rajesh Thyagarajan

*Mukundaprasada Stavaraja*

pdf was typeset on June 29, 2023

Please send corrections to *sanskrit@cheerful.com*